# केन्द्रीयविद्यालयसङ्घटनम्

## आञ्चलिकशिक्षाप्रशिक्षणसंस्था (ZIET)

सिद्धार्थनगरम्, मैसूरु (SIDDARHTHA NAGAR – MYSORE )

**कक्ष्या- दशमी** **संस्कृतम्**

**SANSKRIT** **CLASS -X**

सूर्यः

(चेतसः प्रचोदकाः प्रश्नाः)

# HOTS

**प्रथमः पाठः-**

॥ वाङ्मयं तपः ॥

**प्रथमः श्लोकः-**

अ) <u>**सन्निधिं**</u> सन्निधिं क्रियात् – अत्र रेखाङ्कितपदस्य सन्धिं विच्छेदयत।

आ) शरत्कालीनम् इत्यर्थे अत्र किं पदं प्रयुक्तम् ?

इ) शारदायाः विशेषणद्वयं लिखत ।

ई) शारदाम्भोजवदना –अस्मिन् पदे कः प्रत्ययः ।

**द्वितीयः श्लोकः**

अ) कस्याः कोषः अपूर्वः ?

आ) सं + चयात् – अनयोः पदयोः सन्धिं कुरुत।

इ) आयः –अस्य विलोमपदं किम्?

ई)आगच्छति – इति अर्थे श्लोके किं पदम् अस्ति ?

उ) **इदं** कोषः अस्ति । अत्र वाक्यदोषं दूरीकुरुत।

**तृतीयः श्लोकः**

सूर्यः

अ) तस्य एकः एव चक्षुः अस्ति । (वाक्यदोषं दूरीकुरुत)

आ)<u>**सत्यसमं**</u> तपः नास्ति । स्थूलाक्षारपदम् आश्रित्य प्रश्ननिर्माणं कुरुत।

इ)**विद्यासमं** – चक्षुः नास्ति । अत्र स्थूलाक्षरपदस्य विग्रहवाक्यं लिखत।

ई) त्यागः अस्य विलोमपदं किम् ?

उ) कया समं चक्षुः नास्ति ?

**चतुर्थः श्लोकः**

अ) प्रह्लादयति इति क्रियापदस्य कर्तृपदं किम् ?

आ) उक्तिः इति अर्थे श्लोके किं पदं प्रयुक्तम् ?

इ) वारि इति अर्थे श्लोके किम् पदम् अस्ति ?

उ) चन्दनरसः + न अनयोः पदयोः सन्धिं कुरुत।

ऊ) श्लोके निषेधार्थकं अव्ययं किम् ?

**पञ्चमः श्लोकः**

अ) बुध्दिगुणेषु चतुर्थः गुणः कः ?

आ) अपोहशब्दस्य अर्थः- १ विपक्षे तर्कः २.स्वपक्षे तर्कः ३.शुष्कः तर्कः

इ) दोषाः – इति पदस्य विलोमशब्दः कः ?

**षष्ठः श्लोकः**

अ) पाठकगुणेषु द्वितीयः गुणः कः?

आ) **<u>एता</u>**ः पाठकगुणाः सन्ति । वाक्यदोषं दूरीकुरुत ।

इ) कटुता –अस्य विलोमपदं श्लोकात् चिनुत।

ई) **<u>अक्षरव्यक्तिः</u>** पाठकगुणेषु अन्तर्भवति । रेखङ्कितपदम् आश्रित्य प्रश्ननिर्माणम् कुरुत।

उ) पद + छेदः = अत्र सन्धिं कुरुत।

ऊ) श्लोकात् अव्ययद्वयं चिनुत।

**सप्तमः श्लोकः**

अ) छात्रः इति अर्थे श्लोके किं पदं प्रयुक्तम् ?

२. शिष्यः ज्ञानस्य तृतीयं पादं कथं प्राप्नोति ?

३.शिष्यः **<u>सब्रह्मचारिभिः</u>** पादं आदत्ते । रेखाङ्कितपदमाश्रित्य प्रश्ननिर्माणं कुरुत।

४.स्वीकरोति इति स्थाने किं क्रियापदं प्रयुक्तम् ?

५.**<u>स्वमेधया</u>** पादं आदत्ते । रेखाङ्कितपदमाश्रित्य प्रश्ननिर्माणं कुरुत।

६.गुरोः इति स्थाने अत्र किम् पदमस्ति ?

**अष्टमः श्लोकः**

अ)किम् अनुद्वेगकरं भवेत् ?

आ) सत्यकथनं **<u>वाङ्मयं</u>** तपः इति कथितम् । रेखाङ्कितपदमाश्रित्य प्रश्ननिर्माणं कुरुत।

इ) श्लोकात् वाक्यम् इति पदस्य विशेषणं चिनुत ।

**द्वितीयः पाठः-** **॥ आज्ञा गुरूणां हि अविचारणीया ॥**

**प्रथमः अनुच्छेदः**

**तस्य वचनम् अश्रद्धेयं मत्वा_________________________ अहं तु वनं गच्छामि ॥**

अ) वने इति अर्थे अत्र किं पदं प्रयुक्तम् ?

आ) यूयं इति कर्तृपदस्य क्रियापदं किम् अस्ति ?

इ) सः **सगद्गदम्** उक्तवान् ? अत्र स्थूलाक्षरपदस्य विग्रहवाक्यं लिखत ।

ई) जिह्वा इति अर्थे अत्र किं पदं प्रयुक्तम् ?

उ) मदोद्धताः इति पदं कस्य पदस्य विशेषणम् ?

ऊ) यूथपतिः **सगद्गदम्** उक्तवान् - स्थूलपदमाश्रित्य प्रश्ननिर्माणम् कुरुत ।

ऋ) विचार्य – इति अर्थे अत्र अनुच्छेदे किं पदं प्रयुक्तम् ?

ॠ) स्वीकृत्य – अस्य विलोमपदं किम् ?

**द्वितीयः अनुच्छेदः**

**अथ अन्यसिम् अहनि__________________ वन्हिज्वालाः समुत्थिताः ।**

अ) दिने इति अर्थे अत्र किं पदं प्रयुक्तम् ?

सूर्यः

आ) मेषः **दाहवेदनया** भूमौ लुठति । स्थूलाक्षरपदमाश्रित्य प्रश्ननिर्माणं कुरुत ।

इ) निर्गच्छति – अस्य विलोमपदं किम् ?

ई) प्रलुठतः +तृणेषु – अनयोः सन्धिं कुरुत ।

उ) ऊर्णाप्रचुरः – अस्य अर्थः अस्ति १.लोमबहुलः २.ऊर्णारहितः ३.नसिकाबहुलः

ऊ) मेषः इति पदस्य विशेषणद्वयं किम् ?

**तृतीयः पाठः-** ॥ किं किम् उपादेयम् ॥

**प्रथमः श्लोकः**

अ) हे गुरो –- इति अर्थे अत्र किं पदमस्ति ?

आ) गुरुवचनं किं भवति ?

इ) अकरणीयं कृत्यम् – इति अर्थे अत्र किं पदमस्ति ?

ई) शिष्यहिताय- अस्य विग्रहवाक्यं लिखत।

उ) निरन्तरम् – इति अर्थे अत्र किम् अव्ययम् अस्ति ?

ऊ) अत्र श्लोके कति प्रश्नाः सन्ति ?

**द्वितीयः श्लोकः**

अ) विवेकी **पं+ डितः** भवति । स्थूलाक्षरपदयोः सन्धिं कुरुत।

आ) अमृतम् – अस्य विलोमपदं किम् ?

इ) निर्मलः इति अर्थे किं पदमस्ति ?

ई) अस्मिन् लोके कः शुचिः भवति ?

**तृतीयः श्लोकः**

अ) अनवद्यम्, - अस्य विलोमपदं किमस्ति ?

सूर्यः

आ) दोषरहितम् इति अर्थे किम् पदम् अत्र प्रयुक्तम् ?

इ) जन्तोः मूढता का भवति ?

ई) **विवेकी** सदा जागर्ति । स्थूलाक्षरपदमाश्रित्य प्रश्ननिर्माणम् कुरुत।

**चतुर्थः श्लोकः**

अ) तरलानि कानि सन्ति ?

आ) सज्जनाः _____________किरणसमाः के?( शश + इन् )

इ) वद -इति अर्थे अत्र किं क्रियापदं प्रयुक्तम् ?

ई) सज्जनाः – अस्य विग्रहवाक्यं लिखत ।

उ) सज्जनाः **शशिकिरणसमाः** भवन्ति । स्थूलाक्षरपदमाश्रित्य प्रश्ननिर्माणं कुरुत।

ऊ) रश्मिः इति अर्थे अत्र किं पदं प्रयुक्तम्?

ऋ) चपल- इति अर्थे अत्र किं पदं प्रयुक्तम्?

ॠ) श्लोके कति प्रश्नाः सन्ति ?

**पञ्चमः श्लोकः**

अ) साधुजनमैत्री कीदृशी भवति ?

आ) सज्जनः – इति अर्थे अत्र किं पदं प्रयुक्तम् ?

इ) मानस्य फलं किम्?

ई) समर्थः कः ?

उ) _______________सुखं प्राप्नुवन्ति । ( त्याग+इन् )

ऊ) श्लोकस्थम् अव्ययं किम् ?

**षष्ठः श्लोकः**

A) अमूल्यम् इति अर्थे अत्र किं पदं प्रयुक्तम्?

आ) मरणपर्यन्तं किं कण्टकसदृशं भवति ?

इ) जननम् – इति पदस्य विलोमपदं किम् ?

ई) समये- इति अर्थे किं पदमस्ति श्लोके ?

सूर्यः

**सप्तमः श्लोकः**

A) कस्य वशे **प्राणिगणः** |स्थूलाक्षरपदस्य विग्रहवाक्यं लिखत ।

आ) **<u>पथि</u>** स्थातव्यम् । स्थूलाक्षरपदम् आश्रित्य प्रश्ननिर्माणम् कुरुत।

इ) अस्मिन् श्लोके आगतं विलोमपदं किम् ?

ई) मम जनकः **प्रियं भाषते इति** अस्ति ।– स्थूलाक्षरपदानां समस्तपदं लिखत ।

उ) भवता अत्र एव _____________।(स्था + तव्यत् )प्रत्ययम् उपयुज्य वाक्यं पूरयत ।

**अष्टमः श्लोकः**

A) यः अकार्यरतः भवति तं जनाः किम् इति कथयन्ति ?

आ) वाचालः अस्य विलोमपदं किम्?

इ) जानाति इति क्रियापदस्य कर्ता कः ?

ई) वाक्यानि इति पदस्य विशेषणद्वयं श्लोकात् चित्वा लिखत ।

उ) श्लोकात् अव्ययद्वयं चित्वा लिखत ।

## चतुर्थः पाठः ॥ नास्ति त्यागसमं सुखम् ॥

**प्रथमः अनुच्छेदः**

**अथ एकदा भगवान् बोधिसत्त्वः_______________________ आयान्ति स्म ।**

अ) निशम्य इति अर्थे अनुच्छेदे किं पदं प्रयुक्तम् ?

आ) बालः – अनुच्छेदे अस्य विलोमपदं किं प्रयुक्तम् ?

इ) राज्ञः _____ आकर्ण्य देशान्तरेभ्यः जनाः तं देशम् आयान्ति स्म ।(दानशील + तल्)

ई) असौ इति कर्तृपदस्य किं क्रियापदम् ?

उ)तत्र _____________समूहः अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत् । (अर्थ +इन् )

ऊ) परितः इति अर्थे अत्र किं पदं प्रयुक्तम् ?

ऋ) वस्त्रम् – इति अर्थे अत्र किं पदं प्रयुक्तम् ?

लृ) विनयशीलः –अस्य विग्रहवाक्यं किम् ?

सूर्यः

ए) लब्ध्वा इति अर्थे किं पदं प्रयुक्तम् ?

**द्वितीयः अनुच्छेदः**

**अथ कदाचित् ________________________________ व्याकुलं सञ्जातम् ।**

अ) सकलं – इति पदं कस्य विशेषणम् ?

आ) तस्य **गात्रेषु + अपि** निरासक्तिः जाता ? स्थूलाक्षरपदयोः सन्धिं कुरुत।

इ) अङ्गम् – इति पदस्य पर्यायपदं किम् ?

ई) अल्पम्- इति पदस्य विलोमपदं किम् ?

उ) सं + तोषम् – अनयोः पदयोः सन्धिं कुरुत ।

ऊ) सः अर्थिनां <u>**विरलासङ्ख्याम्**</u> अपश्यत् ।– रेखाङ्कितपदस्य विग्रहवाक्यं लिखत

ऋ) राजा एकदा तत्र ___________ अचिन्तयत् ।वि + चर् + शतृ)

## पञ्चमः पाठः ॥ अभ्यासवशगं मनः ॥

**प्रथमः श्लोकः**

अ) पापं **चरति** पूरुषः –अत्र चरति इति पदस्य अर्थः

१.खादति २.चलति ३.करोति

आ) अस्मिन् श्लोके किं सम्बोधनपदम् अस्ति

इ) सः **अनिच्छन्नपि** पापं चरति – अत्र स्थूलाक्षरपदे सन्धिं विच्छेदयत।

ई) चरति इति क्रियापदस्य कर्ता कः?

उ) अनिच्छन् इत्यत्र कः प्रत्ययः अस्ति ।

ऊ) पूरुषः -अस्य एकं विशेषणं लिखत

**द्वितीयः श्लोकः**

A) मित्रम् - इति अस्य विलोमपदं किमस्ति श्लोके ?

आ) विद्धि - पदस्य अर्थः – १.जानीहि २.मन्ये ३.वेद

इ) कामः **महाशनः** अस्ति । स्थूलाक्षरपदस्य विग्रहवाक्यं लिखत

ई) कामं ____________विद्धि । (वैर +इन्)

उ) **एष क्रोधः**- सन्धिं विच्छेदयत ।

ऊ)विद्धि - इति क्रियापदस्य कर्तृपदं किम् ?

**तृतीयः श्लोकः**

A) पूर्वम् - इति पदस्य अर्थे किं पदम् अत्र प्रयुक्तम् ?

आ) त्यागः इति अर्थे अत्र किं पदं प्रयुक्तम् ?

इ) नराः _______भवन्तु (सुख +इन्) प्रत्ययं उपयुज्य रिक्तस्थानं पूरयत ।

ई) स युक्तः – अत्र सन्धिं विच्छेदयत ?

उ) शक्नोति इति क्रियापदस्य कः कर्ता ?

ऊ) अनुच्छेदात् अव्ययद्वयं चिनुत ?

**चतुर्थः श्लोकः**

अ) ध्ययतः पुंसः – अनयोः किं विशेष्यम्?

आ) सञ्जायते – अत्रः सन्धिं विच्छेदयत ?

इ) **पुंसः** सङ्गः उपजायते । स्थूलपदमाश्रित्य प्रश्ननिर्माणम् कुरुत ।

ई) अभिजायते अस्य कः कर्ता ?

**पञ्चमः श्लोकः**

अ) प्रणश्यति – अत्र सन्धिं विच्छेदयत ?

आ) स्मृतिविभ्रमः – अस्य विग्रहवाक्यं लिखत ।

**षष्ठः श्लोकः**

A) प्रथमम् - इति अर्थे अत्र किं पदमस्ति ?

आ) त्वम् - इति पदं कस्मै प्रयुक्तम् ?

इ) श्लोके किं क्रियापदम् ?

उ) भरतर्षभ – अस्य सन्धिं विच्छेदयत ।

ऊ) अन्ते इति कस्य पदस्य विलोमः?

ऋ) पाप्मानम् इति कस्य पदस्य विशेषणम् ?

**सप्तमः श्लोकः**

अ) अस्मिन् श्लोके मनसः कति विशेषणानि सन्ति ?

आ) मनसः निग्रहं **सुदुष्करम्**

स्थूलाक्षरपदस्य अर्थः- १ सुकरम् २ सुबोध्यम् ३.अतिकठिनम्

इ) श्लोके तस्य इति पदं कस्मै प्रयुक्तम् ।

ई) चञ्चलं इति पदस्य सन्धिं विच्छेदयत ।

उ) पवनस्य -इत्यर्थे श्लोके किं पदं प्रयुक्तम् ?

ऊ) बलवत्- अत्र कः प्रत्ययः?

**अष्टमः श्लोकः**

महाबाहो -अस्य पदस्य विग्रहवाक्यं किम् ?

**मनः** दुर्निग्रहम् अस्ति । –स्थूलपदम् आश्रित्य प्रश्ननिर्माणं कुरुत ।

**कौन्तेय** –इति कस्य सम्बोधनम् ?

## षष्ठः पाठः ॥ साधुवृत्तिं समाचरेत् ॥

**प्रथमः अनुच्छेदः**

**अथ पूर्वमित्रं दुष्टबुद्धिः ______________________________ अस्मात् लोभात् ।**

अ) प्रच्छन्नभाग्यः **सम्भ्रान्तचित्तः** अभवत् ।-स्थूलाक्षरपदस्य विग्रहवाक्यं लिखत ।

आ) घटः – इति अर्थे अत्र किं पदं प्रयुक्तम् ?

इ) दुष्टबुद्धिः -इति कर्तृपदस्य किं क्रियापदम् अत्र प्रयुक्तम् ?

ई) पतिः - इति अर्थे अनुच्छेदे किं पदं प्रयुक्तम्?

उ) सुप्तः – इति पदस्य विलोमपदं किम् ?

ऊ) स्वप्नः + मया – अनयोः सन्धिं कुरुत।

ऋ) धनम् – इति अर्थे अनुच्छेदे किं पदं प्रयुक्तम् अस्ति ?

ॠ) **मध्यरात्रे** सः चौर्यार्थं गतः । स्थूलपदमाश्रित्य प्रश्ननिर्माणं कुरुत ।

ऌ) **अस्माकं** क्षेत्रे अश्वत्थतरुः अस्ति । स्थूलपदमाश्रित्य प्रश्ननिर्माणं कुरुत ।

ए) **तस्मिन् + एव** काले सः सुप्तोत्थितः – स्थूलाक्षरपदयोः सन्धिं कुरुत ।

ऐ) विरम अस्मात् लोभात् -अत्र विरम इति क्रियापदस्य कर्तृपदं किम् ?

सूर्यः

**द्वितीयः अनुच्छेदः**

**दुष्टबुद्धिः तु तयोः वार्तां ______________________________ क्षिप्तवान् ।**

अ) बहिः – इति पदस्य विलोमपदं किम् ?

आ) भूयः इति अर्थे अत्र किं पदं प्रयुक्तम् ?

इ) कृत्वा इति अर्थे अनुच्छेदे किं पदं प्रयुक्तम् ?

**ई) भित्तौ** सन्धिं प्रकल्प्य कलशं गृहाभ्यन्तरे निक्षिप्तवान् । स्थूलपदमाश्रित्य प्रश्ननिर्माणं कुरुत

उ) **तस्य मध्यतः** सर्पः बहिरागतः । स्थूलाक्षारपदयोः समासं कुरुत ।

ऊ) **तं** च आदाय – अत्र तम् इति पदं कस्मै प्रयुक्तम् ?

ऋ) क्षिप्तवान् इति क्रियायाः कर्ता कः ?

ऌ) सः फूत्कारं _______ एकं सर्पम् अपश्यत् ।(कृ +शतृ)

ए) सः एकं **भयङ्करं** सर्पं दृष्टवान् । स्थूलाक्षरपदस्य विग्रहवाक्यं लिखत ।

## नाट्यांशः

**सप्तमः पाठः** ॥ रमणीया हि सृष्टिरेषा ॥

**प्रथमः नाट्यांशः**

**राजहंसः – हुं ! किमनेन** --------------------------------------------------

-------------------------------------------- **काकचेष्टा बकध्यानम् ।**

अ) गायामि इति अर्थे अत्र नाट्यांशे किं पदं प्रयुक्तम् ?

आ) "भो वाचाल " इति अत्र वाचाल इति सम्बोधनपदं कस्मै प्रयुक्तम् ?

इ) अस्माकं ऐक्यं **जगत्प्रसिद्धम्** – अत्र स्थूलाक्षरपदस्य विग्रहवाक्यं लिखत ।

ई) सत्यम् – अस्य विलोमपदं किम् ?

उ) मातरः इति कर्तृपदस्य कर्मपदं किम् अस्ति अनुच्छेदे ?

ऊ) **कटुभिः** क्वणितैः जनजागरणं करोषि। स्थूलाक्षरपदम् आश्रित्य प्रश्ननिर्माणम् कुरुत।

ऋ) छात्राणां कृते अहम् **आदर्शः + एव** । स्थूलाक्षरपदयोः सन्धिं कुरुत।

ॠ) यदि – तर्हि इति अव्यययुग्मस्य स्थाने किम् अव्ययं नाट्यांशे प्रयुक्तम् ?

**द्वितीयः नाट्यांशः**

**बकः- (प्रविश्य, स्वपक्षौ अवधूय) – हुं ! किमनेन**
--------------------------------------------------
------------------------------------------------------------------------------------
--------------- **पक्षिकुलं त्वया ।**

अ) अवमानितं खलु सर्वं पक्षिकुलं त्वया । अवमानितम् इति क्रियायाः कर्ता कः ।

आ) **दुग्धधवलाः** मे पक्षाः । अत्र स्थूलाक्षरपदस्य विग्रहवाक्यं लिखत ।

इ) सर्पः इति अर्थे नाट्यांशे किं पदं प्रयुक्तम् ।

ई) बकः मीनान् ________________भक्षयति। (क्रूर +तल्)

उ) सः **शीतलं जलं , तस्मिन्** स्नानं करोति |–

स्थूलाक्षरपदानां समस्तं पदं लिखत ।

ऊ) बकः मीनान् **क्रूरतया** भक्षयति । स्थूलाक्षपदम् आश्रित्य प्रश्ननिर्माणं कुरुत ।

**ऋ) वर्षर्तौ** त्वं मानसं पलायसे । अत्र स्थूलाक्षरस्य पदस्य सन्धिं विच्छेदय ।

ॠ) मोचयित्वा इति पदस्य कः विपरीतार्थकः शब्दः अत्र प्रयुक्तः ?

ऌ) अहं **वृष्टेः** अभिनन्दनं करोमि । अत्र रेखाङ्कितं पदम् आश्रित्य प्रश्ननिर्माणं कुरुत।

## अष्टमः पाठः ॥ तिरुक् कुरल् सूक्तिसौरभम् ॥

**प्रथमः श्लोकः**

**अ)विद्याधनं** महत् –- अत्र स्थूलपदस्य विग्रहवाक्यं लिखत ।

आ) कृतघ्नः- अस्य विलोमपदं किम् ?

**इ) बाल्ये** पिता विद्याधनं यच्छति । स्थूलपदम् आश्रित्य प्रश्ननिर्माणं कुरुत ।

ई) इत्युक्तिः- अत्र सन्धिं विच्छेदयत । सूर्यः

उ) रामः <u>**कृतज्ञः**</u> आसीत् । – स्थूलाक्षरपदस्य विग्रहवाक्यं किम् ?

**द्वितीयः श्लोकः**

A) **वाचि** अवक्रता भवेत् – स्थूलपदम् अश्रित्य प्रश्ननिर्माणं कुरुत।

**आ)** मनसि इति अर्थे श्लोके किं पदं प्रयुक्तम् ?

इ) भवेत् इति क्रियापदस्य कर्तृपदं किम् ?

ई) श्लोके अव्यययुग्मं किम् ?

**तृतीयः श्लोकः**

अ) **धर्मप्रदां** वाचं वदेत् । – स्थूलपदम् अश्रित्य प्रश्ननिर्माणं कुरुत।

आ) फलं पक्वम् – अनयोः पदयोः किं विशेषणम् ?

इ) मतिः इति अर्थे अत्र किं पदं प्रयुक्तम्?

ई) **परुषां** वाचं वदेत् –अत्र परुषां पदस्य अर्थः- १.कठिनाम् २.पुरुषस्थाम् ३.साररहिताम्

उ) विमूढधीः अपक्वं फलं **भुङ्क्ते** । अत्र स्थूलाक्षरपदस्य सन्धिं विच्छेदयत।

ऊ) सुधीः अस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

**चतुर्थः श्लोकः**

**अ)विद्वांसः + एव** – पदयोः सन्धिं कुरुत ।

आ) लोकेऽस्मिन् ते चक्षुष्मन्तः प्रकीर्तिताः- अत्र लोकेऽस्मिन् अनयोः पदयोः किं विशेषणम् ?

इ)विद्वांसः ___________ भवन्ति ।( चक्षुष् +मतुप्) वाक्यं पूरयत ।

ई) ते **विद्वांसः** । स्थूलपदम् आश्रित्य प्रश्ननिर्माणं कुरुत ।

उ) ते **चक्षुर्नामनी** मते । स्थूलपदम् अश्रित्य प्रश्ननिर्माणं कुरुत ।

**पञ्चमः श्लोकः**

अ) सः विवेकः इति ईरितः – अत्र ईरितः शब्दस्य अर्थः – १.उक्तः २.दृष्टः ३.ज्ञातः

आ) शक्यः **भवेत् + येन** - स्थूलाक्षरपदमाश्रित्य सन्धिं कुरुत ।

**षष्ठः श्लोकः**

अ)श्लोके निपुणः इति अर्थे किं पदं प्रयुक्तम् ?

आ) मन्त्री **धैर्यवान्** भवेत् । स्थूलपदम् अश्रित्य प्रश्ननिर्माणं कुरुत ।

इ) परिषदि इति अर्थे श्लोके किं पदं प्रयुक्तम् ?

ई) मन्त्री **सभायाम्** अकातरः भवति । स्थूलपदम् आश्रित्य प्रश्ननिर्माणं कुरुत

उ) मन्त्री -------------------भवेत् (धैर्य +मतुप्)

**सप्तमः श्लोकः**

अ) सः **श्रेयः** इच्छति । स्थूलपदम् आश्रित्य प्रश्ननिर्माणं कुरुत ।

आ) श्लोके कर्म इति पदस्य विशेषणम् किम् ?

इ) इच्छति इति क्रियापदस्य कर्तृपदं किम् ?

ई) द्वितीयायां पङ्क्तौ किं क्रियापदम् ?

उ) परस्य इति पदस्य विलोमपदं किम् ?

ऊ) मनुष्यः**आत्मनः** श्रेयः इच्छति । स्थूलाक्षरपदम् आश्रित्य प्रश्ननिर्माणं कुरुत ।

**अष्टमः श्लोकः**

अ) विदुषां वचः किं भवति?

आ) तस्मात् **सदाचारं** रक्षेत् । - स्थूलाक्षरपदस्य सन्धिं विच्छेदयत ।

इ) वाणी इति अर्थे अत्र किं पदम् अस्ति?

ई) एतत्। विदुषां **वचः** । स्थूलाक्षरपदम् आश्रित्य प्रश्ननिर्माणं कुरुत ।

उ) **प्रथमः + धर्मः** आचारः। स्थूलाक्षरपदयोः सन्धिं कुरुत।

ऊ) एतत् + वचः स्थूलाक्षरपदयोः सन्धिं कुरुत

**नवमः पाठः** ‖ राष्ट्रं संरक्ष्यमेव हि ‖

**प्रथमः नाट्यांशः**

**युधिष्टिरः-सम्प्रति आश्वस्तः अस्मि ।___________________________**

**____________________________________________________**

**________________सञ्चालयितुम् अपि समर्थः न अभवत् ।**

अ) **सञ्चालयितुम्** अपि समर्थः न अभवत् । **स्थूलाक्षरपदस्य सन्धिं विच्छेदयत।**

आ) त्वं तस्य **मनसः वृत्तिं** न जानासि । स्थूलाक्षरपदयोः समासं कुरुत ।

इ) त्वं **धनुः + चक्रं** वा इच्छसि । अत्र रेखाङ्कितपदे आश्रित्य सन्धिं कुरुत ।

ई) दक्षिणेन इति पदस्य विलोमपदं किम् ?

उ) **पितुः उपदेशेन** ' अनयोः पदयोः समासं कुरुत।

ऊ) **पितुः** उपदेशेन असन्तुष्टः सः एकदा द्वारकापुरीम् आगच्छत् । स्थूलाक्षरपदम् आश्रित्य प्रश्ननिर्माणं कुरुत ।

ऋ) एषा मम **सव्या** पाणिः। दोषं दूरीकुरुत।

ॠ)देहि - इति पदस्य विलोमपदं नाट्यांशात् चित्वा लिखत ।

**द्वितीय :नाट्यांशः**

**नारदः – (व्यासः प्रति ) पश्यतु भवान् । कोयं अनर्थःक्रियते ।**

**______________________________________________________________**

**_________________________________जगत् ध्वस्तं भविष्यति ।**

अ) सहस्रशः उल्काः भूमौ पतन्ति ।- अस्मिन् वाक्ये किम् अव्ययम् ?

आ) एतौ निवारणीयौ – अत्र एतौ इति पदं काभ्यां प्रयुक्तम् ?

आ) पृथ्वी इति अर्थे किं पदं प्रयुक्तम् ?

इ) अन्यथा सकलं जगत् ध्वस्तं भविष्यति । - अस्मिन् वाक्ये विशेष्यं किम् ?

ई) वृक्षः इति अर्थे अत्र किं पदम् प्रयुक्तम् ?

उ) समन्तात् ________प्रचण्डानलशिखाः आकाशं लिहन्ति इव ।( वृध् + शानच् )

ऊ) **पवनः** स्तब्धः जातः । स्थूलाक्षरपदस्य सन्धिं विच्छेदयत।

ऋ) अग्निः – इति अर्थे अत्र किं पदं प्रयुक्तम् ?

**दशमः पाठः** **॥ सुस्वागतं भो अरुणाचलेऽस्मिन् ॥**

**प्रथमः नाट्यांशः**

पर्यटनाधिकारी – शोभनम्। उचितम् उक्तम् ________________________

________________________ प्रत्युत संस्कृतिः अपि ।

अ) सौरभम् इति अर्थे अत्र कः शब्दः प्रयुक्तः ?

आ) अस्य प्रदेशस्य केवलं प्रकृतिः एव न विविधा **मनोहरा** च प्रत्युत संस्कृतिः अपि ।

अत्र स्थूलाक्षरपदे कः प्रत्ययः अस्ति?

इ) क्षीणा- अस्य विलोमपदं किम् अस्ति अनुच्छेदे ?

ई) केवलं प्रकृतिः एव न विविधा मनोहार च प्रत्युत संस्कृतिः अपि –

अस्मिन् वाक्ये कस्य पदद्वयस्य विशेषणद्वयं प्रयुक्तम् ?

उ) हिमाद्रितुङ्गशृङ्गैः – अस्मिन् समस्तपदे पर्वतः इति अर्थे किं पदं प्रयुक्तम् ?

ऊ) **विपुला** च अत्र वनसम्पदा – अत्र रेखाङ्कितपदम् आश्रित्य प्रश्ननिर्माणं कुरुत।

ऋ) **प्रकृतिः** मानोहरा अस्ति । अत्र रेखाङ्कितपदम् आश्रित्य प्रश्ननिर्माणं कुरुत ।

पर्यटनाधिकारी- मिथुनः गोमहिषसदृशः एकः विशिष्टः

________________________________________ पश्यत एतत् चित्रम् ।

अ) अत्र स्थितानां – इति अर्थे अत्र किं पदं प्रयुक्तम् ?

आ) एकः इति सङ्ख्याअवाचकं विशेषणं कस्मै प्रयुक्तम् ?

इ) पश्यत – इति क्रियापदस्य कर्तृपदं किम् ?

ई) गोमहिषसदृशः – अस्य पदस्य विग्रहवाक्यं लिखत ।

उ)_________ स्थलानां दर्शनाय विशेषः प्रबन्धः अपि वर्तते ।(दृश् + अनीयर् )

ऊ) केषां + चित् स्थालानाम् परिचयं प्राप्स्यामः । अत्र रेखाङ्कितपदे आश्रित्य सन्धिं कुरुत।

ऋ) अस्मिन् अनुच्छेदे वयम् इति कर्तृपदस्य क्रियापदं किम्?

**एकादशः पाठः** **॥ कालोऽहम् ॥**

**प्रथमः अनुच्छेदः**

**–कालोऽहम् । __________________ शृणुत ध्यानेन ।**

A) जगतः **आयुः प्रमाणम्** अहं जानामि ।– स्थूलाक्षरपदयोः विग्रहवाक्यं किम् ?

आ) भविष्यत् + अपि अनयोः पदयोः सन्धिं कुरुत।

इ) सर्वं **क्रियाकलापं** पश्यामि । -स्थूलाक्षरपदस्य विग्रहवाक्यं किम् ?

उ) ते **ध्यानेन** श्रुण्वन्ति । स्थूलाक्षरपदमाश्रित्य प्रश्ननिर्माणं कुरुत।

ऊ) अनुच्छेदे शृणुत – इति क्रियापदस्य कर्तारः के?

ऋ) अहं **<u>जगदुत्पत्तेः</u>** साक्षी । स्थूलाक्षरपदमाश्रित्य प्रश्ननिर्माणं कुरुत

लृ) अहं ____________ अस्मि। (वि + ईक्ष् + शानच् ) प्रकृतिप्रत्ययं च योजयत ।

ए) **इदं** सृष्टिः अतीवप्राचीना । वाक्यं दोषं दूरिकुरुत ।

ऐ) **अयं** जगत् पुनः पुनः उत्पद्यते । वाक्यं दोषं दूरिकुरुत

**द्वितीयः अनुच्छेदः**

सूर्यः

मम कलनस्य आधारः सूर्यः ____________________________ एव अराणि ।

अ)सूर्यस्य द्वे **गतयः** । वाक्यं दोषं दूरिकुरुत

आ) दक्षिण + अयनम् अनयोः सन्धिं कुरुत ।

इ) एकस्य अयनस्य अवधिः कति मासाः भवन्ति ?

ई) मम कलनस्य आधारः सूर्यः – अत्र ममेति पदं कस्मै प्रयुक्तम् ?

उ) भारतीयमासानां नामानि **नक्षत्रनामभिः** सम्बद्धानि । स्थूलाक्षरपदमाश्रित्य प्रश्ननिर्माणं कुरुत ।

ऊ) प्रथमस्य मासस्य नाम **चैत्रः** ॥ स्थूलाक्षरपदमाश्रित्य प्रश्ननिर्माणं कुरुत ।

ऋ) **षट् + नाभेः** अर्थं वेद सः परः कविः । स्थूलाक्षरपदमाश्रित्य सन्धिं कुरुत ।

ॠ) श्लोके किं क्रियापदम् ?

लृ) सः परः कविः – अत्र कविः पदस्य अर्थः- १.पण्डितः २. लेखकः ३.छात्रः

ए) द्वादशमासाः एव _______ गण्यन्ते ( अक्ष + त्व)

ओ) ऋतवः मे नाभयः। मे इति पदं कस्मै प्रयुक्तम् ?

औ ) **परः + कविः** सः – अत्र  स्थूलक्षरपदस्योः सन्धिं कुरुत ।

अं) **प्रत्येकम्**  अयनस्य अवधिः षट् मासाः । स्थूलाक्षरपदस्य विग्रहवाक्यं लिखत।

अः) भारतीयमासानां **नाम**  नक्षत्रनामभिः सम्बद्धानि । वाक्यदोषं दूरीकुरुत ।

क) संवत्सरचक्रे __________ अराणि सन्ति। (६०)

## अधोलिखितेषु वाक्येषु स्थूलाक्षरपदानि संशोध्य वाक्यदोषं  परिहरत ।

१ मम **त्रयः** भगिन्यः सन्ति ।

२.भावान् किं **करोषि** ?

३.सः **श्वः**  आपणम् अगच्छत् ।

४.वयं भोजनं **करोमि** ।

५.अस्माकं पाठशाला **भव्यः** अस्ति ।

६.**इयं** मम श्वानः ।

७.भगवद्गीतायां **अष्टादशाः** अध्यायाः सन्ति ।

९. **ह्यः** ते मैसूरुनगरं गमिष्यन्ति ।

१०. मनः **तरलः** अस्ति ।

११.ज्योतिः **तमं** नाशयति ।

१२. फलविक्रेता **बहून्** फलानि विक्रीणाति ।

१३. हे जगतः **पिता** ! मां रक्षतु ।

१४.मम **पञ्चानि** अपि मित्राणि ह्यः  मम गृहं आगच्छन् ।

१५. **भवती** कदा आगतः ?

१६.त्वम्  अपि **आगच्छतु** ।

१७.विनयशीलस्य आयुः **वर्धति** ।

१८. अश्वारोही धावतः **अश्वेन** पतति ।

१९.इयं **मातरं** मधुरं ददाति ।

२०.अहं तत् सम्यक् **जानाति** ।

२१.मम भ्राता **सुयोग्या** अस्ति ।

२२.सः **मतिवान्** छात्रः ।

२३.सा प्रत्यहं गृहम् **आगत्वा** क्रीडति ।

२४.मम एकः **भ्रातः** अस्ति ।

२५. वयं सदा उत्तमं **कर्मं** कुर्मः ।

२६ अहं **दीपावलीपर्वं** द्रष्टुं ग्रामं गच्छामि ।

२७.तव कति **मित्राः** सन्ति ?

२८ वयं प्रतिदिनं विद्यालयात् गृहं **त्रयवादने** प्रत्यागच्छामः ।

२९. **इमे** बालिकाः नृत्यन्ति ।

३० तत्र एकं **महान्** वनम् अस्ति ।

३१. वृक्षे **अनेकाः** वानराः उपविशन्ति ।

३२.**सर्वो** जनाः दुःखिनः मा भवन्तु । सूर्यः

३३.त्वं मा **हससि** ।

३४. विद्यासागरः संस्कृते महान् **विद्वांसः** अस्ति ।

३५ . **गुरुणा** परितः छात्राः उपविशन्ति ।

३६ सः **द्वे** वादने एव गतवान् ।

३७. त्वाम् अहं श्वः **पश्यामि**।

३८. सा श्वः एव क्षीरं **पिबति** ।

३९. मम मित्रं श्वः अस्मिन् समये देहल्यां **तिष्ठति** ।

४० मैसूरुनगरे **एताः** शाटिका क्रीता ।

## संख्यावाचकवेशेषणैः वाक्यानि पूरयत।

१.मम समीपे ______________ रूप्यकाणि सन्ति ।(१००)

२.तस्मिन् विद्यालये _______________अध्यापिकाः सन्ति । (१००)

३.धृतराष्ट्रस्य ______________________ पुत्राः आसन् । (१००)

४. सः ________________ अपि वेदान् पठति ।(४)

५.________________ वने कश्चन ऋषिः तपः आचरति ।(१)

६. ______ वृक्षयोः मध्ये आवाम् आक्रीडाव ।(२)

७.____________ भार्यासु रामस्य मात कौसल्या एव् ज्येष्ठा (३)

८.सा _______________ पुत्राणां पालनम् अकरोत् ।(३)

९.एतेभ्यः ______ छात्रेभ्यः पुस्तकानि प्रयच्छतु भवान् ।(४)

१०.सा ____________ बालिकाभिः सह् क्रीडति (३)

११.अर्जुनस्य _________ धनुः आसीत् ।

१२.________________प्राणाः ।(५)

१३.कनकं __________ उपायैः परीक्ष्यते ।(४)

१४._______ मार्गाणाम् एषः मार्गः उत्तमः ।(४)

१५_______________कूपीनाम् एषा कूपी दीर्घा वर्तते ।(४)

**प्रियाः छात्राः ! उत्तरलेखानार्थं एते अंशाः अवधेयाः।**

**उत्तरलेखनसमये सुन्दराणि अक्षराणि भवन्तु । उत्तराणां मध्ये किञ्चित् स्थलं त्यक्त्वा उत्तराणि लिखन्तु ।**

**व्याकरणांशानाम् उत्तरलेखनसमये केवलम् उत्तराणि लिखन्तु**

**(एकपदेन /एकवाक्येन वा )**

प्रत्येकं पाठात्

१.कस्मै प्रयुक्तम् इति २. विशेषणम् ३. विशेष्यम् ४ सन्धयः ५.समासविग्रहाः, ६.समानार्थकानिपदानि ७. विलोमार्थकानि पदानि ८.अव्ययानि ९. प्रश्ननिर्माणार्थं योग्यानि पदानि ११. कर्तृपदम् १२. कर्मपदम् १४. उपपदविभक्तीः च अवश्यं ज्ञेयानि। सरलसंस्कृतवाक्यानां प्रयोगः क्रियेत चेत् वाक्यदोषाः परिहृताः भवन्ति । सर्वनामपदानां प्रयोगः ज्ञातव्यः ।

विशेषणविशेष्ययोः ज्ञानेन पत्रलेखनं सुलभं भवति ।

## ॥ जयतु गीर्वाणी ॥

# उत्तराणि

**प्रथमः पाठः-** **॥ वाङ्मयं तपः ॥**

सूर्यः

**प्रथमः श्लोकः-**

अ) सत् + निधिम्

आ) शारदम्

इ) शारदाम्भोजवदना, सर्वदा ।

ई) टाप् ।

**द्वितीयः श्लोकः**

अ)भारत्याः

आ) सञ्चयात्

इ) व्ययः ।

ई)आयाति ।

उ) **अयं** कोषः अस्ति ।

**तृतीयः श्लोकः**

अ) तस्य एकम् एव चक्षुः अस्ति ।

आ) **कीदृशं** तपः नास्ति ।

इ) विद्यया समं – चक्षुः नास्ति ।

ई) त्यागः अस्य विलोमपदं किम् ?

उ) विद्यया समं चक्षुः नास्ति ।

**चतुर्थः श्लोकः**

अ) प्रह्लादयति इति क्रियापदस्य कर्तृपदं मधुरभाषिणी वाणी ।

आ) वाणी

इ) सलिलम्

उ) चन्दनरसो न

ऊ) न

**पञ्चमः श्लोकः**

सूर्यः

अ) धारणम्

आ) विपक्षे तर्कः

इ) गुणाः

**षष्ठः श्लोकः**

अ) अक्षरव्यक्तिः

आ) एते पाठकगुणाः सन्ति ।

इ) मधुरता

ई) **का** पाठकगुणेषु अन्तर्भवति ?

उ) पदच्छेदः

ऊ) तु च ।

**सप्तमः श्लोकः**

अ) शिष्यः।

२. कालेन

३.शिष्यः कैः पादं आदत्ते ?

४.आदत्ते

५.कया पादं आदत्ते ?

६.आचार्यात्

**अष्टमः श्लोकः**

अ)वाक्यम् अनुद्वेगकरं भवेत् ।

आ) सत्यकथनं कीदृशं तपः इति कथितम् ?

इ) अनुद्वेगकरम् ।

**द्वितीयः पाठः-** **॥ आज्ञा गुरूणां हि अविचारणीया ॥**

**प्रथमः अनुच्छेदः**

**तस्य वचनम् अश्रद्धेयं मत्वा________________________ अहं तु वनं गच्छामि ॥**

अ) अटव्याम्

आ)जानीथ

इ) गद्गदेन सहितम् ।

ई) रसना

उ) कपयः

ऊ) यूथपतिः कथम् उक्तवान्?

ऋ) मत्वा

ॠ) विहाय

**द्वितीयः अनुच्छेदः**

**अथ अन्यस्मिन् अहनि_________________ वन्हिज्वालाः समुत्थिताः ।**

अ) अहनि

आ) मेषः **किमर्थं** भूमौ लुठति ?

इ) प्रविशति ।

ई) प्रलुठतस्तृणेषु

उ) १.लोमबहुलः

ऊ) लोमबहुलः ,जाज्वल्ययमानशरीरः ।

## तृतीयः पाठः- ॥ किं किम् उपादेयम् ॥

**प्रथमः श्लोकः**

A) भगवन् –

आ) गुरुवचनम् उपादेयं भवति ।

इ) अकार्यम्

सूर्यः

ई) शिष्येभ्यः हितं तस्मै

उ) सततम्

ऊ)त्रयः प्रश्नाः सन्ति ।

**द्वितीयः श्लोकः**

अ) विवेकी **पण्डितः** भवति ।

आ) विषम्

इ) शुचिः

ई) अस्मिन् लोके यस्य मानसं शुद्धं सः शुचिः भवति ।

**तृतीयः श्लोकः**

अ) अवद्यम्

आ) अनवद्यम्

इ) जन्तोः मूढता निद्रा भवति ।

ई) **कः** सदा जागर्ति ?

**चतुर्थः श्लोकः**

अ) तरलानि यौवनं धनं आयुः च सन्ति ?

आ) सज्जनाः शशिनः किरणसमाः के?

इ) कथय

ई) सन्तः जनाः

उ) सज्जनाः **कथं** भवन्ति ?

ऊ) किरणः

ऋ) तरलम्

ॠ)द्वौ प्रश्नौ स्तः।

**पञ्चमः श्लोकः**

अ) साधुजनमैत्री सुखदा भवति ।

आ) साधुः

सूर्यः

इ) अनर्थम्

ई) त्यागी

उ) त्यागिनः सुखं प्राप्नुवन्ति ।

ऊ) सर्वथा

**षष्ठः श्लोकर्**

A) अनर्घम्

आ) मरणपर्यन्तं प्रच्छन्नंकृतं यत् पापं भवति तत् कण्टकसदृशं भवति ।

इ) मरणम्

ई) अवसरे

**सप्तमः श्लोकः**

अ) प्राणिनां गणः ।

आ) कुत्र स्थातव्यम् ?

इ) दृष्टम् -अदृष्टम्

ई) मम जनकः **प्रियभाषी** अस्ति ।

उ) भवता अत्र एव स्थातव्यम् ।

**अष्टमः श्लोकः**

A) यः अकार्यरतः भवति तं जनाः अन्धः इति कथयन्ति ।

आ) मूकः

इ) यः नरः

ई) प्रियाणि हितानि

उ) न वक्तुम्

## चतुर्थः पाठः ॥ नास्ति त्यागसमं सुखम् ॥

**प्रथमः अनुच्छेदः**

सूर्यः

**अथ एकदा भगवान् बोधिसत्त्वः__________________________ आयान्ति स्म ।**

अ) आकर्ण्य

आ) वृद्धः

इ) राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्यः जनाः तं देशम् आयान्ति स्म ।

ई) पालयति स्म

उ)तत्र अर्थिनां समूहः अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत् (अर्थ +इन् )

ऊ) समन्ततः पदं प्रयुक्तम् ।

ऋ) वसनम् –पदं प्रयुक्तम् ।

लृ) विनयः शीलं यस्य सः ।

ए) प्राप्य इति पदं प्रयुक्तम् ।

**द्वितीयः अनुच्छेदः**

**अथ कदाचित् ____________________________________ व्याकुलं सञ्जातम् ।**

अ)  ब्रह्माण्डम् – इति  पदस्य विशेषणम्  ।

आ)  गात्रेष्वपि ।

इ) गात्रम् ।

ई) बहु।

उ) सन्तोषम् ।

ऊ) सः अर्थिनां विरलां सङ्ख्याम्_अपश्यत्।

ऋ) राजा एकदा तत्र **विचरन्** अचिन्तयत् । (  वि + चर् + शतृ)

**पञ्चमः पाठः                    ॥   अभ्यासवशगं मनः  ॥**

**प्रथमः श्लोकः**

अ) पापं **चरति**  पूरुषः –अत्र चरति  इति पदस्य अर्थः

करोति

आ) वार्ष्णेय ।

सूर्यः

इ) सः अनिच्छन्   पापं चरति – अत्र स्थूलाक्षरपदे  सन्धिं विच्छेदयत।

ई) चरति  इति क्रियापदस्य कर्ता पूरुषः।

उ) अनिच्छन्  इत्यत्र शतृ  प्रत्ययः अस्ति ।

ऊ) अनिच्छन् प्रयुक्तः ।

**द्वितीयः श्लोकः**

अ) वैरिणम्

आ) विद्धि - पदस्य अर्थः –जानीहि ।

इ) कामः महत् अशनं यस्य सः अस्ति ।

ई)  कामं वैरिणं विद्धि । (वैर +इन्)

उ) एषः + क्रोधः

ऊ) विद्धि - इति क्रियापदस्य कर्तृपदं  त्वम् ।

**तृतीयः श्लोकः**

अ) पूर्वम् - इति पदस्य अर्थे प्राक् पदं अत्र प्रयुक्तम् ।

आ) त्यागः इति अर्थे अत्र विमोक्षणम् इति पदं प्रयुक्तम् ।

इ) नराः सुखिनः भवन्तु (सुख +इन्) ।

ई) सः + युक्तः |

उ) शक्नोति इति क्रियापदस्य कर्ता यः नरः।

ऊ) इह सोढुम्, प्राक्

**चतुर्थः श्लोकः**

अ) पुंसः –विशेष्यम्।

आ) सं +जायते |

इ)कस्य सङ्गः उपजायते ?

ई)अभिजायते अस्य कर्ता क्रोधः ।

**पञ्चमः श्लोकः**

अ) प्र + नश्यति

आ) स्मृतेः विभ्रमः ।

**षष्ठः श्लोकः**

A) प्रथमम् इति अर्थे अत्र आदौ इति पदमस्ति ।

आ) अर्जुनाय इति पदं प्रयुक्तम्।

इ) श्लोके - क्रियापदं प्रजहि ।

उ) भरत+ ऋषभ

ऊ) आदौ

ऋ) कामम्

**सप्तमः श्लोकः**

अ) अस्मिन् श्लोके मनसः चत्वारि विशेषणानि सन्ति ।

आ) मनसः निग्रहं सुदुष्करं – अस्य अर्थः अतिकठिनम् ।

इ) श्लोकेतस्य इति पदं मनसे प्रयुक्तम् ।

ई) चं + चलं ।

उ) वायोः

ऊ) बलवत्- अत्र मतुप् : प्रत्ययः अस्ति ।

**अष्टमः श्लोकः**

महान्तौ बाहू यस्य सः , तत् सम्बोधने

**किं** दुर्निगहम् अस्ति ।

**कौन्तेय** –इति अर्जुनस्य सम्बोधनम् ।

## षष्ठः पाठः ॥ साधुवृत्तिं समाचरेत् ॥

**प्रथमः अनुच्छेदः**

**अथ पूर्वमित्रं दुष्टबुद्धिः ______________________________ अस्मात् लोभात् ।**

अ) सम्भ्रान्तं चित्तं यस्य सः

आ) घटः – इति अर्थे अत्र कलश इति पदं प्रयुक्तम् ।

इ) दुष्टबुद्धिः -इति कर्तृपदस्य क्रियापदम् स्थितः।

ई) ‘नाथ इति पदं प्रयुक्तम् । सूर्यः

उ) सुप्तः – इति पदस्य विलोमपदं उत्थितः ।

ऊ) स्वप्नो मया

ऋ) द्रव्यम्

ॠ) **कदा** सः चौर्यार्थं गतः ?

ऌ) **केषां** क्षेत्रे अश्वत्थतरुः अस्ति ?

ए) **तस्मिन्नेव** काले सः सुप्तोत्थितः ।

ऐ) विरम अस्मात् लोभात् -अत्र इति क्रियापदस्य कर्तृपदं त्वम् ।

**द्वितीयः अनुच्छेदः**

**दुष्टबुद्धिः तु तयोः वार्तां ______________________________ क्षिप्तवान् ।**

अ) अभ्यन्तरे ।

आ) भूयः इति अर्थे अत्र पुनः इति पदं प्रयुक्तम् ।

प्रइ) प्रकल्प्य ।

ई) **कुत्र** सन्धिं प्रकल्प्य कलशं गृहाभ्यन्तरे निक्षिप्तवान् ?

उ) तन्मध्यतः।

ऊ) **तं** च आदाय – अत्र तम् इति पदं कलशाय प्रयुक्तम् ?

ऋ) क्षिप्तवान् इति क्रियायाः कर्ता दुष्टबुद्धिः ।

ॡ) सः फूत्कारं कुर्वन्तम् एकं सर्पम् अपश्यत् ।(कृ +शतृ)

ए) सः एकं **भयं करोति इति तं,** सर्पं दृष्टवान् । स्थूलाक्षरपदस्य विग्रहवाक्यं लिखत ।

## नाट्यांशः

## सप्तमः पाठः ॥ रमणीया हि सृष्टिरेषा ॥

### प्रथमः नाट्यांशः

**राजहंसः – हुं ! किमनेन --------------------------------------------------------**

**-------------------------------------------------- काकचेष्टा बकध्यानम् ।**

अ)गायामि इति अर्थे अत्र नाट्यांशे आलपामि इति पदं प्रयुक्तम् ।

आ)'भो वाचाल " इति अत्र वाचाल इति सम्बोधनपदं काकाय प्रयुक्तम् ।

इ)अस्माकं ऐक्यं **जगत्प्रसिद्धम्** – अत्र स्थूलाक्षरपदस्य विग्रहवाक्यं जगति प्रसिद्धम् ।

ई) अनृतम्

उ)मातरः इति कर्तृपदस्य कर्मपदं शिशून् अस्ति ।

ऊ) **कीदृशैः** क्वणितैः जनजागरणं करोषि ?

ऋ) छात्राणां कृते अहम् **आदर्श एव** ।

ॠ) यदि – तर्हि इति अव्यययग्मस्य स्थाने चेत् इति अव्ययं नाट्यांशे प्रयुक्तम् ।

### द्वितीयः नाट्यांशः

**बकः- (प्रविश्य, स्वपक्षौ अवधूय) – हुं ! किमनेन**

**--------------------------------------------------------**

------------------------------------------------------------------------------------------------

--------------- **पक्षिकुलं त्वया ।**

A) अवमानितं त्वया

आ)दुग्धम् इव धवलाः मे पक्षाः ।

इ) अहिः

ई) बकः मीनान् क्रूरतया भक्षयति। (क्रूर +तल्)

उ) सः **शीतलजले** स्नानं करोति |–

ऊ) बकः मीनान् **कथं** भक्षयति ?

ऋ**) वर्षा + ऋतौ** त्वं मानसं पलायसे ।

ॠ) मोचयित्वा इति पदस्य विपरीतार्थकः शब्दः अधिगृह्य प्रयुक्तः ।

लृ) अहं **कस्याः** अभिनन्दनं करोमि ?अत्र रेखाङ्कितं पदम् आश्रित्य प्रश्ननिर्माणं

सूर्यः

कुरुत ।

## अष्टमः पाठः ॥ तिरुक् कुरल् सूक्ति सौरभम् ॥

**प्रथमः श्लोकः**

**अ)विद्याधनं** महत् –- विद्या एव धनम्

आ) कृतज्ञः- अस्य विलोमपदं किम् ?

**इ) कदा** पिता विद्याधनं यच्छति ?

ई) इति + उक्तिः

उ) रामः कृतं जानाति

**द्वितीयः श्लोकः**

B) **कुत्र** अवक्रता भवेत् ?

**आ)** मनसि इति अर्थे श्लोके चित्ते ¯ पदं प्रयुक्तम् ।

इ) भवेत् इति क्रियापदस्य कर्तृपदं अवक्रता ।

ई) श्लोके अव्यययुग्मं  यथा-तथा  ।

**तृतीयः श्लोकः**

अ) **कीदृशीं**  वाचं वदेत् ।

आ) फलं पक्वं – अनयोः पदयोः पक्वं विशेषणम् ।

इ) मतिः इति अर्थे अत्र धीः इतिपदं प्रयुक्तम् ।

ई) **परुषां** वाचं वदेत् –अत्र परुषां पदस्य अर्थः- १.कठिनाम्  २.पुरुषस्थाम् ३.साररहिताम्

उ) विमूढधीः अपक्वं फलं **भुङ्क्ते** । अत्र  स्थूलाक्षरपदस्य सन्धिं विच्छेदयत।

ऊ) विमूढधीः

**चतुर्थः  श्लोकः**

**अ)विद्वांस  एव** ।

आ) लोकेऽस्मिन् ते चक्षुष्मन्तः प्रकीर्तिताः- अत्र लोकेऽस्मिन्  अनयोः पदयोः अस्मिन् विशेषणम् ।

इ)विद्वांसः चक्षुष्मन्तः भवन्ति ।( चक्षुष् +मतुप्) वाक्यं पूरयत ।

ई) ते **के ?** ।

सूर्यः

उ) ते **के**   मते । स्थूलपदम् अश्रित्य प्रश्ननिर्माणं कुरुत ।

**पञ्चमः श्लोकः**

अ) सः विवेकः इति ईरितः – अत्र ईरितः शब्दस्य अर्थः –उक्तः

आ) शक्यः **भवेद्येन**

**षष्ठः श्लोकः**

अ)श्लोके निपुणः इति अर्थे पटुः इति  पदं प्रयुक्तम् ।

आ**)** मन्त्री  **कीदृशः**  भवेत् ?

इ) परिषदि इति अर्थे श्लोके सभायाम् इति पदं प्रयुक्तम् ।

ई) मन्त्री **कुत्र**  अकातरः भवति ?

उ) मन्त्री धैर्यवान् भवेत् ।(धैर्य +मतुप्)

**सप्तमः श्लोकः**

A) सः **किम्** इच्छति ?

आ) श्लोके कर्म इति पदस्य विशेषणम् अहितम् ।

इ) इच्छति इति क्रियापदस्य कर्तृपदं यः नरः ।

ई) द्वितीयायां पङ्क्तौ कुर्यात् क्रियापदम् ।

उ) परस्य इति पदस्य विलोमपदं आत्मनः ।

ऊ) मनुष्यः **कस्य** श्रेयः इच्छति ?

**अष्टमः श्लोकः**

अ) विदुषां वचः आचारः प्रथमो धर्मः इति एतद् भवति ।

आ) तस्मात् **सत् + आचारं** रक्षेत् ।

इ) वाणी इति अर्थे अत्र वचः पदं अस्ति ।

ई) एतत् विदुषां **किम् ?**

उ) **प्रथमो धर्मः** आचारः।

ऊ) एतद्वचः।

सूर्यः

## नवमः पाठः ॥ राष्ट्रं संरक्ष्यमेव हि ॥

**प्रथमःनाट्यांशः**

**युधिष्टिरः-सम्प्रति आश्वस्तः अस्मि ।__________________________**

**__________________________________________________**

**________________सञ्चालयितुम् अपि समर्थः न अभवत् ।**

अ) **सं +चालयितुम्** अपि समर्थः न अभवत् ।

आ) त्वं तस्य **मनोवृत्तिं** न जानासि ।

इ) त्वं **धनुश्चक्रं** वा इच्छसि ।

ई) सव्येन इति पदस्य विलोमपद् किम् ?

उ) **पित्रुपदेशेन** ।

ऊ) **कस्य** उपदेशेन असन्तुष्टः सः एकदा द्वारकापुरीम् अगच्छत् ?

ऋ) एषा मम **सव्यः** पाणिः।

ॠ)देहि - इति पदस्य विलोमपदं गृहाण ।

**द्वितीय ःनाट्यांशः**

**नारदः – (व्यासं प्रति) पश्यतु भवान् । कोऽयं अनर्थः क्रियते**

**____________________________________________________________**

**________________________________जगत् ध्वस्तं भविष्यति ।**

A) सहस्रशः उल्काः भूमौ पतन्ति ।- अस्मिन् वाक्ये सहस्रशः अव्ययम् ।

आ) एतौ निवारणीयौ – अत्र एतौ इति पदं अश्वत्थामार्जुनाभ्यां प्रयुक्तम् ।

आ) पृथ्वी इति अर्थे मही पदं प्रयुक्तम् ।

इ) अन्यथा सकलं जगत् ध्वस्तं भविष्यति । - अस्मिन् वाक्ये विशेष्यं जगत् ।

ई) वृक्षः इति अर्थे अत्र द्रुमः पदम् प्रयुक्तम्।

उ) समन्तात् वर्तमानाः प्रचण्डानलशिखाः आकाशं लिहन्ति इव ।( वृध् + शानच् )

ऊ) **पो + अनः** स्तब्धः जातः ।

ऋ) अग्निः – इति अर्थे अत्र अनलः पदं प्रयुक्तम् ।

**दशमः पाठः** **॥ सुस्वागतं भो अरुणाचलेऽस्मिन् ॥**

**प्रथमः नाट्यांशः** सूर्यः

**पर्यटनाधिकारी – शोभनम्। उचितम् उक्तम् ______________________**

**______________________ प्रत्युत संस्कृतिः अपि ।**

A) सौरभम् इति अर्थे अत्र सुगन्धिः इति शब्दः प्रयुक्तः ।

आ) अस्य प्रदेशस्य केवलं प्रकृति एव न विविधा **मनोहरा** च प्रत्युत संस्कृतिः अपि ।

अत्र स्थूलाक्षरपदे टाप् प्रत्ययः अस्ति ।

इ) क्षीणा- अस्य विलोमपदं विपुला इति अस्ति ।

ई) केवलं प्रकृतिः एव न विविधा मनोहार च प्रत्युत संस्कृतिः अपि – अस्मिन् वाक्ये प्रकृतिः संस्कृतिः इति पदद्वययस्य विशेषणद्वयं प्रयुक्तम् ।

उ) हिमाद्रितुङ्गशृङ्गैः – अस्मिन् समस्तपदे पर्वतः इति अर्थे अद्रिः इति पदं प्रयुक्तम् ।

ऊ) कीदृशी च अत्र वनसम्पदा ?

ऋ) **का** मानोहरा अस्ति?

**पर्यटनाधिकारी- मिथुनः गोमहिषसदृशः  एकः विशिष्टः**

**__________________________________________  पश्यत एतत् चित्रम् ।**

अ) अत्रत्यानाम्  ।

आ) एकः इति सङ्ख्याअवाचकं विशेषणं  राजपशवे  प्रयुक्तम् ।

इ) पश्यत – इति क्रियापदस्य कर्तृपदं यूयम् ।

ई) गोमहिषसदृशः – अस्य पदस्य विग्रहवाक्यं गवा महिषेण  च सदृशः अथवा गोमहिशाभ्यां सदृशः  ।

उ) दर्शनीयानाम् स्थलानां दर्शनाय विशेषः प्रबन्धः अपि वर्तते ।(दृश् + अनीयर् )

ऊ) केषञ्चित्  स्थालानाम् परिचयं प्राप्स्यामः ।

ऋ) अस्मिन् अनुच्छेदे वयम् इति कर्तृपदस्य क्रियापदं पश्यामः

**एकादशः पाठः                    ॥ कालोऽहम् ॥**

**प्रथमः अनुच्छेदः**

**–कालोऽहम् । __________________  शृणुत ध्यानेन ।**

सूर्यः

अ)जगतः  **आयुषः प्रमाणम्**  अहं जानामि ।

आ)  भविष्यदपि ।

इ)  सर्वं **क्रियायाः कलापं**   पश्यामि ।

उ) ते **कथं** श्रुण्वन्ति ?

ऊ) अनुच्छेदे शृणुत – इति क्रियापदस्य कर्तारः यूयम्

ऋ) अहं **कस्याः**   साक्षी ?

लृ) अहं वीक्षमाणः  अस्मि। (वि + ईक्ष् + शानच् )

ए)  **इयं** सृष्टिः अतीवप्राचीना ।

ऐ) **इदं** जगत् पुनः पुनः उत्पद्यते ।

**द्वितीयः  अनुच्छेदः**

मम कलनस्य आधारः सूर्यः ______________________________ एव अराणि ।

अ)सूर्यस्य द्वे **गती** ।

आ) दक्षिणायनम्

इ) एकस्य अयनस्य अवधिः षट् मासाः  भवन्ति ।

ई) मम कलनस्य आधारः सूर्यः – अत्र ममेति पदं कालाय प्रयुक्तम् ।

उ) भारतीयमासानां नामानि **कैः** सम्बद्धानि ?

ऊ) प्रथमस्य मासस्य नाम **किम्**  ?

ऋ) **षण्णाभेः** ।

ॠ) श्लोके वेद इति  क्रियापदम्

लृ) सः परः कविः – अत्र कविः पदस्य अर्थः पण्डितः

ए) द्वादशमासाः एव अक्षत्वेन गण्यन्ते ( अक्ष + त्व)

ओ) ऋतवः मे नाभयः। मे इति पदं कालाय प्रयुक्तम् ।

औ ) **परः + कविः**

अं) एकम् एकं प्रति अथवा एकस्मिन् एकस्मिन् ।

अः) भारतीयमासानां **नामानि** नक्षत्रनामभिः सम्बद्धानि ।

क) संवत्सरचक्रे षष्टिः अराणि सन्ति (६० )

## ॥ जयतु  गीर्वाणी  ॥